प्रमाणोपन्यासात्तत्र तु प्रतीच्यत्वमेव स्थेयकृतप्रमाणसाध्यसाधुतां विनैकरूपता चेत्यस्तु विस्तरः । एवं प्रत्याकलितमाकलितम् । अधुना क्रियापादो विविच्यते । तत्र कात्यायनः । वादिना यदभिप्रेतं स्वयं साधयितुं स्फुटम् । तत्साध्यं साधनं येन तत्साध्यं साध्यतेऽखिलम् । सारभूतं पदं मुक्त्वा निःसाराणि बहून्यपि । संसाधयेत् क्रियायान्तु तान्त्यजात् सारवर्जिताम् । पक्षद्वयं साधयेद्वा तांस्त्यज्याद्दूरतः क्रियाम् । क्रियां बलवतीमुक्त्वा दुर्बलां योऽवलम्बते । स जयेऽवधृते सभ्यैः पुनस्तान्नाप्नुयात् क्रियामिति” । ताम्बलवतीम् । तेन प्रागेव प्रबलं प्रमाणमुद्भाव्य दुर्बलप्रमाणावलम्बनेन पराजितस्य पश्चात्प्रबलप्रमाणोपन्यासावसरो नास्तीत्यर्थः । अतएवाह नारदः “निर्णिक्ते व्यवहारे तु प्रमाणमफलं भवेत् । लिखितं साक्षिणो वापि पूर्वमावेदितं नचेति” । निर्णिक्ते शोधिते अन्यतरजयपराजयान्यतरावधारणं प्रापित इति यावत् । पूर्वमेव दुर्बलप्रबलप्रमाणोपन्यासे कृते तु सर्वप्रमाणानुसारेण कृतं निरस्येत्यभिधानात् निर्णयः । पश्चादुद्भावितन्तु कृत्रिमत्वादिशङ्काकलङ्कितमित्यनुपादेयमेवेत्यर्थः । अतएव पूर्ववाक्येऽपि मुक्त्वेति पुनरिति चोक्तम् । सएव “यथा पक्वेषु धान्येषु निष्फलाः प्रावृषो गुणाः । निर्णिक्तव्यवहाराणां प्रमाणमफलं तथेति” । उत्तरे पत्रनिवेशिते साध्यसिद्धेः साधनाय तत्साधननिर्देशः कुर्य्यादित्यपेक्षिते याज्ञवल्क्य आह “ततोऽर्थी लेखयेत्सद्यः प्रतिज्ञातार्थसाधनम्” । तत्र उत्तरलिखनानन्तरमर्थी अर्थ्यत इत्यर्थः साध्यं सोऽस्यास्तीत्यर्थी साध्यवान् सद्य एवाविलम्बेन प्रतिज्ञातस्य प्रतिज्ञाविषयस्यार्थस्य साध्यस्य साधनम् साध्यतेऽनेनेति साधनं प्रमाणम् । साधनादि लौकिकमलौकिकं वा लेखयेत् लेखकद्वारा । स्वयं वा लिखेदित्यपि द्रष्टव्यम् दृष्टार्थत्वात् अत्र सद्य इति वदन्नुत्तराभिधाने कालविलम्बनमप्यनुमन्यते । तच्च विशेषपरिभाषायां विवक्ष्यते । अर्थी लेखयेदित्यनेन सम्प्रतिपत्तौ न कस्याप्यर्थित्वमिति न कोऽपि साधनं लेखयेदिति पादद्वयेनैव व्यवहारनिर्वाहः तथाचोक्तम् “द्विपात्सम्प्रतिपत्तिस्तिष्ठति मिथ्योत्तरे पूर्ववादिनं एवार्थित्वात् सएव साधनं लेखयेत् । कारणोत्तरप्राङ्न्यायोत्तरयोस्तु प्रत्यर्थ्येव साध्यवान् कारणप्राङ्न्याययोस्तस्यैव साध्यत्वादिति स एव लेखयेदित्युक्तं भवति । तेन ‘प्राङ्न्यायकारणोक्तौ तु प्रत्यर्थी निर्दिशेत् क्रियाम् । मिथ्योक्तौ पूर्ववादी तु प्रतिपत्तौ न सा भवेत् । मिथ्या क्रिया पूर्ववादे कारणे प्रतिवादिनि । प्राङ्न्यायेऽपि तथैव स्यात् प्रतिपत्तौ न सा भवेदिति” न्यासादिस्मृत्युक्तोऽर्थिपदेन सङ्क्षेपतः सर्व एवोक्तो भवति । अत्र चण्डेश्वरः “साहसस्तेयपारुष्यगोऽभिशापात्यये स्त्रियाम् । विवादयेत्सद्य एव कालोऽन्यत्रेच्छया स्मृतः” । इत्यत्र सद्यो विवादयेदुत्तरन्दापयेदित्यनेन प्रत्यर्थिपक्षस्य लिखने विलम्बप्राप्तौ साहसादिषु तत्पक्षमपि सद्य एव लेखयेदिति योऽपवादः स यदि प्राग्भाषावादिपक्षलिखने विलम्बोक्त्यर्थप्राप्तः प्रत्यर्थिपक्षलिखनविलम्बः स्यात् तदैव घटते नान्यथेत्येतद्वाक्यव्याख्याने यदर्थिपदेन प्रत्यवस्कन्दनप्राङ्न्याययोः प्रत्यर्थ्येवाऽर्थी जात इति स एव साधनं लेखयेदिति । प्रत्यर्थिनोऽपि ग्रहणमिति मिताक्षराकारव्याख्यानं तत्पूर्वापरविरोधान्मन्दमित्याह” । तदतिसाहसम् भाषोत्तरवादिपक्षमात्रलेखनपरत्वं यद्यनयोर्वाक्ययोस्तर्हि साधनपदान्वये समासानुपपत्तेः सन्दर्भविरोधाच्च साधनलेखनस्यैवोत्तरलेखनोत्तरमाकाङ्क्षितत्वात् साहसादिष्वप्युत्तरभेदव्यवस्थया द्वयोरपि पूर्ववाक्योपात्तसाधनलेखने सद्यस्त्वर्थाक्षिप्तोत्तरलेखनविलम्बापवादोपपत्तेः । नचोत्तरलेखनं सर्वत्र प्रत्यर्थिन एवेति तद्विलम्बानुमतिविमत्योस्तं प्रत्येव प्रतिपादनार्हमिति वाच्यम् एतावतापि क्रियोपन्यासप्रतिपालवचनस्यार्थिपदेन भाषावादिमात्रग्रहणाग्रहे नियामकाभावात् । प्रत्युत मिथ्याक्रियेत्यादिवचनार्थसंग्रहाय द्वयोरपि ग्रहणमर्थिपदेनेत्यस्यैव युक्तत्वात् । एवं सति मिताक्षरायां पूर्वापरविरोधापादनमज्ञानविलसितमेवेत्यास्तां तावत् । बृहस्पतिः “द्विप्रकारा क्रिया प्रोक्ता मानुषी दैविकी तथा । एकैकानेकधा भिन्ना मुनिभिस्तत्त्ववादिभिः । साक्षिलेख्यानुमानञ्च त्रिविधा मानुषी क्रिया” । साक्षिलेख्यानुमानमिति द्वन्द्वैकवद्भावः । “साक्षी द्वादशभेदस्तु लिखितं दशधा स्मृतम् । अनुमानन्तु द्विविधन्नवधा दैविकी क्रिया” । इदं संख्याभिधानञ्च नियमाय भेदान्तराणामपि प्रमाणप्रकरणे वक्ष्यमाणत्वात् । कात्यायनः “लिखितं साक्षिणो भुक्तिः प्रमाणन्त्रिविधं विदुः । लेशोद्देशस्तु युक्तिः स्याद्दिव्यानीह विषादयः” । लेशोऽन्यथानुपपन्नो धर्मस्तस्योद्देशो विमर्शो युक्तिरित्यर्थः । “पूर्ववादेऽपि लिखिते यथाऽक्षरमशेषतः । अर्थी तृतीयपादे तु क्रियया प्रतिपादयेत्” । पूर्ववादो भाषालिखितं पूर्व-